॥ श्री नरसिंहनखस्तुतिः ॥

पांत्वस्मान् पुरुहूतवैरिबलवन् मातंग माद्यद्घटा
कुंभोच्चाद्रि विपाटनाधि कपटु प्रत्येक वज्रायिताः ।
श्रीमत्कंठीरवास्य प्रततसुनखरा दारितारातिदूर
प्रध्व स्तध्वांतशांत प्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकांत समंततोऽपि कलयन् नैवेशि तुस्ते समं
पश्याम् युत्तमवस्तु दूरतरतो आपास्तं रसो योऽष्टमः ।
यद्रो षोत्कर दक्षनेत्रकुटिल प्रांतोत्थिताग्नि स्फुरत्
खद्यो तोपम विष्फुलिंग भसिता ब्रह्मेश शक्रोत्कराः ॥ २ ॥
॥ इति श्रीमद् आनंदतीर्थ भगवत् पादकृता श्री नरसिंह नखस्तुतिः संपूर्णा ॥

मंगलाचरण

ओम् ॥ श्रीमद् विष्ण्वंघ्रिनिष्ठा आतिगुण गुरुतम श्रीमदानंदतीर्थ
त्रैलोक्या चार्य पादो ज्ज्वलजल जलसत् पांत् वोऽस्मान् पुनंतु ।
वाचां यत्र प्रणेत्री त्रिभुवन महिता शारदा शारदेंदु
ज्योत्स्ना भद्रस्मितश्री धवलितककुभा प्रेम भारंबभार ॥ १ ॥

[फलश्रुतिः १: ई स्लोका भाषण मत्तु चिंतनेयल्लि स्पष्टते नीडुत्तदे.]

उत्कंठा कुंठकोला हलजवविदिता जस्र सेवानुवृद्ध

प्राज्ञा त्मज्ञानधूतां धतमससुमनो मौलिरत्नाव लीनाम्।
भक्त्यु द्रेकावगाड प्रघटनसधटा त्कार संघृष्यमाण प्रांत प्रांग्र्यांघ्रि
पीठ् त्थितकनकरजः पिंजरा रंजिताशाः ॥२॥

[फलश्रुतिः २: ई स्लोका ओब्बर आलोचने प्रक्रियेयन्नु
सुधारिसुत्तदे.]

जन्माधि व्याध्युपाधि प्रतिहति विरह प्रापकाणां गुणानाम
अग्र्याणाम् मर्पकाणां चिरमुदित चिदानंद संदोहदानाम्।
ऐतेषा मेष दोष प्रमुषित मनसां द्वेषिणां दूषकाणां
दैत्यानाम् आर्तिमंधे तमसि विदधतां संस्तवे नास्मि शक्तः ॥ ३ ॥

[फलश्रुतिः ३: ई स्लोका अडेतडेगळु मत्तु दुःखदिंद स्वातंत्र्यवन्नु
नीडुत्तदे]

अस्या विष्कर्तुकामं कलिमलकलुषे ऽस्मिन्जने ज्ञानमार्गं
वंद्यं चंद्रेंद्र रुद्र द्युमणि फणिवयो नायकाद्यैरि हाद्य ।
मध्वाख्यं मंत्रसिद्धं किमुत कृतवतो मारु तस्यावतारं
पातारं पारमेष्ठ्यं पदमपविपदः प्राप्तुरा पन्नपुंसाम् ॥ ४ ॥

[फलश्रुतिः ४: ई स्लोका मंत्रगळु मत्तु जापगळ पठणदल्लि
यशस्सन्नु नीडुत्तदे.]

उद्यद्विद्युत् विप्रचंडां निजरुचिनिकर व्याप्त लोकावकाशो
बिभ्रद् भीमो भुजेयो ऽभ्युदितदिनकरा भांगदाढ्य प्रकांडे ।

वीर्यो द्धार्यां गदाग्र्याम यमिह सुमतिं वायुदेवो विदध्य्
आदध्यात्म ज्ञाननेता यतिवर महितो भूमि भूषा मणिर्मे ॥ ५ ॥

[फलश्रुतिः ५: ई स्लोकावु कैगोंड यावुदे केलसदल्लि ओब्बर प्रयत्नगळ साक्षात्कारवन्नु नीडुत्तदे]

संसारो त्तापनित्यो पशमदसदय स्नेहहा सांबुपूर
प्रोद्य द्विद्यानवद्य द्युतिमणि किरण श्रेणि संपूरिताशः।
श्रीवत्सां काधिवासो चिततरसरल श्रीमद् आनंदतीर्थ
क्षीरांभो धिर्विभिंद्याद् भवदनभिमतं भूरिमे भूतिहेतुः ॥ ६ ॥

[फलश्रुतिः ६: ई स्लोकावु फलप्रद स्नेहवन्नु नीडुत्तदे मत्तु दुःखगळन्नु तेगेदुहाकुत्तदे.]

मूला वायु

मूर्धन्ये षोऽंजलिर्मे दृढतर मिहते बध्यते बंध पाश
च्छेत्रे दात्रे सुखानां भजति भुवि भविष्य द्विधात्रे द्युभर्त्रे ।
अत्यंतं संततंत्वं प्रदिश पदयुगे हंत संताप भाजाम्
अस्माकं भक्तिमेकां भगवत उतते माधवस्याथ वायोः ॥ ७ ॥

[फलश्रुतिः ७: ई स्लोकावु लौकिक लगत्तुगळिंद मत्तु भावनेगळिंद स्वातंत्र्यवन्नु नीडुत्तदे मत्तु देह मत्तु मनस्सन्नु बलपडिसुत्तदे]

साभ्रोष्णा भीशु शुभ्र प्रभम भयनभो भूरि भू भृद्वि भूति
भ्राजिष्णु र्भूऋभूणां भवनमपि विभो ऽभेदि बभ्रे बभूवे ।
येनभ्रू विभ्रमस्ते भ्रमयतु सुभृशं बर्भृ वद्दुर् भृताशान्
भ्रांतिर् भेदाव भासस् त्विति भयमभि भूर् भौक्ष्यतो मायिभिक्षून् ॥
८ ॥

[फलश्रुतिः ८ः ई स्लोका अनगत्य उत्साहदिंद व्यक्तियन्नु शमनगोळिसुत्तदे.]

येऽमुं भावं भजंते सुरमुख सुजना राधितं ते तृतीयं
भासंते भासुरैस्ते सहचरचलितै श्चामरै श्चारुवेषाः ।
वैकुंठे कंठलग्न स्थिरशुचि विलसत् कांति तारुण्यलीला
लावण्या पूर्णकांता कुचभरसुलभा श्लेष सम्मोद सांद्राः ॥ ९ ॥

[फलश्रुतिः ९ः ई स्लोका महिळेयरिंद सौकर्यवन्नु कंडुकोळ्ळलु सहाय माडुत्तदे]

आनंदा न्मंदमंदा ददतिहि मरुतः कुंद मंदार नंद्या
वर्त्यामोदान् दधाना मृदपदमुदितो द्गीतकैः सुंदरीणाम् ।
वृंदै रावंद्यमुक्तें द्वहि मगुमद नाहींद्र देवेंद्रसेव्ये
मौकुंदे मंदरेऽस्मिन् नविरतमुदयन् मोदिनां देवदेव ॥ १० ॥

[फलश्रुतिः १०ः ई स्लोका मक्कळु मत्तु सामान्य संतोषदिंद संतोषवन्नु नीडुत्तदे.]

उत्तप्ता त्युत्कटत्विट् प्रकटकटकट ध्वानसंघट्ट नोद्यद्विद्
युद्व्य् ऊढस्फुलिंग प्रकर विकिरणो त्क्राथिते बाधितांगान् ।
उद्गाढं पात्यमाना तमसि तत इतः किंकरैः पंकिलेते
पंक्तिर्ग्राव्णां गरिम्णा ग्लपयतिहिभव द्द्वेषिणो विद्वदाद्य ॥ ११ ॥

[फलश्रुतिः ११: ई स्लोका ओब्बर शत्रुगळ मेले गेलुवन्नु
नीडुत्तदे.]

अस्मिन्न स्मद्गुरूणां हरिचरण चिरध्यान सन्मंगलानां
युष्माकं पार्श्व भूमिं धृतरणरणिक स्वर्गिसेव्यां प्रपन्नः ।
यस्तूदास्तेस आस्ते अधिभवम सुलभ क्लेश निर्मोकमस्त
प्रायानंदं कथंचि न्नवसति सततं पंच कष्टेऽति कष्टे ॥ १२ ॥

[फलश्रुतिः १२: ई स्लोकावु सोमारितनवन्नु तेगेदुहाकुत्तदे मत्तु
भक्ति यन्नु देवर कडेगे हदगोळिसलु सहाय माडुत्तदे]

क्षुत्क्षामान् रूक्षरक्षो रदखरनखर क्षुण्ण विक्षोभि ताक्षान्
आमग्ना नंधकूपे क्षुरमुख मुखरैः पक्षिभि र्विक्षतांगान् ।
पूया सृङ्मूत्रविष्ठा कृमिकुल कलिले तत्क्षण क्षिप्तशक्त्या
द्यस्त्र व्रातादितांस्त्व द्द्विष उपजिहते वज्रकल्पा जलूकाः ॥ १३ ॥

[फलश्रुतिः १३: ई स्लोका बडतन मत्तु सोमारितनवन्नु
तेगेदुहाकुत्तदे मत्तु शत्रुगळन्नु नाशमाडुत्तदे.]

मातर्मे मातरिश्वन् पितरतुलगुरो भ्रातरिष्टाप्त बंधो

स्वामिन् सर्वांतरात्मन् नजरजरयितर् जन्म मृत्याम् अयानाम् ।
गोविंदे देहि भक्तिं भवति च भगवन्न् ऊर्जितां निर्निमित्तां
निर्व्याजां निश्चलां सद्गुणगण बृहतीं शाश्वतीम् आशुदेव ॥ १४ ।

[फलश्रुतिः १४: ई स्लोका हिरियरिगे गौरव मत्तु विधेयते
बेळेसलु मत्तु समाजदल्लिन जनरल्लि गौरववन्नु गळिसलु सहाय
माडुत्तदे]

विष्णो रत्युत्तमत्वाद् अखिलगुणगणै स्तत्र भक्तिं गरिष्ठाम्
आश्लिष्टे श्रीधराभ्याम् अमुमथ परिवारात्मना सेवकेषु ।
यः संधत्ते विरिंचे श्वसनविहगपा नंतरुद्रेंद्रपूर्वे
ष्वाध्यायं स्तारतम्यं स्फुटमवति सदा वायुरस्मद् गुरुस्तम् ॥ १५
॥

[फलश्रुतिः १५: ई स्लोका देवर अरिवु मत्तु महत्तरतेयन्नु
अभिवृद्धिपडिसलु सहाय माडुत्तदे.]

तत्त्वज्ञान् मुक्तिभाजः सुखयसि हि गुरो योग्यता तारतम्याद्
आधत्से मिश्रबुद्धीं स्त्रिदिवनिरयभू गोचरा न्नित्यबद्धान् ।
तामिस्रां धादिकाख्ये तमसि सुबहुलं दुःख यस्यन्य थाज्ञान्
विष्णो राज्ञा भिरित्थं श्रुतिशतमिति हासादिचाऽ कर्णयामः ॥ १६
॥

[फलश्रुतिः १६: ई स्लोका मोक्षवन्नु पडेदुकोळ्ळलु सहाय
माडुत्तदे.]

हनूमान्

वंदेऽहं तं हनूमान् इति महितमहा पौरुषो बाहुशाली
ख्यात स्तेऽग्र्योऽवतारः सहित इह बहु ब्रह्म चर्यादि धर्मैः ।
सस्नेहानां सहस्वान् अहरहरहितं निर्दहन् देहभाजाम्
अंहो मोहापहोयः स्पृहयति महतीं भक्तिमद्यापि रामे ॥ १७ ॥

[फलश्रुतिः १७: ई स्लोका असाध्यवाद कार्यगळन्नु निर्वहिसलु सहाय माडुत्तदे.]

प्राक् पंचा शत्सहस्रै र्व्यवहितममितं योजनैः पर्वतं त्वं
यावत् संजीवना द्यौषध निधि मधिक प्राण लंकामनैषीः ।
अद्राक्षी दुत्पतंतं तत उत गिरिमुत् पाटयंतं गृहीत्वा
यांतं खे राघवांघ्रौ प्रणतमपि तदै कक्षणे त्वां हि लोकः ॥ १८ ॥
[फलश्रुतिः १८: ई स्लोका अनेक भीतिगोळिसुव रोगगळिगे विरुद्धवागि प्रतिविषवागि कार्यनिर्वहिसुत्तदे.]

क्षिप्तः पश्चात्सलीलं शतमतुलमते योजनानां सौच्च
स्तावद्वि स्तारवांश्चा प्युपलव इव व्यग्रबुद्ध्या त्वयाऽतः ।
स्वस्वस्था नस्थितातिस् थिरशकलशिला जाल संश्लेषनष्ट
च्छेदांकः प्रागिवाभूत् कपिवरवपुष स्तेनमः कौशलाय ॥ १९ ॥

[फलश्रुतिः १९: ई स्लोका तत्वगळ मेले ओब्बर निलुवु साधिसलु, नष्टगळन्नु मत्तु मनस्सिन असमर्थतेयन्नु निर्वहिसलु

सहाय माडुत्तदे.]

दृष्ट्वा दुष्टाधि पोरः स्फुटित कनकस द्वर्म घृष्टास्थिकूटं
निष्पिष्टं हाटकाद्रि प्रकट तटतटा कातिशंको जनोऽभूत् ।
येनाजौ रावणारि प्रियनटनपटु र्मुष्टिरिष्टं प्रदेष्टुं
किं नेष्टे मेसतेऽष्टा पदकटकतटि त्कोटिभा मृष्टकाष्ठः ॥ २० ॥

[फलश्रुतिः २०: ई स्लोका ओब्बर शत्रुगळ मेले गेलुवन्नु नीडुत्तदे.]

देव्या देशप्रणीति द्रुहिण हरवरा वध्यरक्षो विघाताद्
यासेवो द्यद्दयार्द्रः सहभुजमकरो द्रामनामा मुकुंदः ।
दुष्प्रापे पारमेष्ठ्ये करतलमतुलं मूर्ध्नि विन्यस्य धन्यं
तन्वन् भूयः प्रभूत प्रणय विकसिता ब्जेक्षण स्त्वेक्षमाणः ॥ २१ ॥

[फलश्रुतिः २१: ई स्लोका ओब्बर आसेगळन्नु पूरैसुत्तदे.]

भीमसेन

जघ्ने निघ्नेन विघ्नो बहुल बलबक ध्वंसनाद्येन शोचद्वि
प्रानुक्रोशपाशै रसुविधृति सुखस्यैक चक्राजनानाम्।
तस्मै ते देव कुर्मः कुरुकुलपतये कर्मणा च प्रणामान्
किर्मीरं दुर्मतीनां प्रथममथ च यो नर्मणा निर्ममाथ ॥ २२ ॥

[फलश्रुतिः २२: ई स्लोका ओब्बर प्रगतियल्लि अडेतडेगळन्नु

निर्वहिसलु सहाय माडुत्तदे.]

निर्मृद्नन्न् अत्ययत्नं विजरवरजरा संधकायास्थि संधी
न्युद्धेत्वं स्वध्वरे वा पशुमिव दमयन् विष्णुपक्षद् विडीशम् ।
यावत् प्रत्यक्षभूतं निखिल मखभुजं तर्पया मासिथासौ
तावत्या ऽऽयोजि तृप्त्या किमु वद भगवन् राजसू याश्वमेधे ॥ २३
॥
[फलश्रुतिः २३: ई स्लोका शत्रुगळ मेले विजयवन्नुंटुमाडुत्तदे.]

क्ष्वेला क्षीणाट्टहासं तवरणमरि हन्न् उद्धदो द्दामबाहो
र्बह्वक् षौहिण्यनीक क्षपण सुनिपुणं यस्य सर्वोत्तमस्य ।
शुश्रूषार्थं चकर्थ स्वयमयमथसं वक्तुम् आनंदतीर्थ–
श्रीमन्नामन् समर्थ स्त्वमपि हि युवयोः पादपद्मं प्रपद्ये ॥ २४ ॥

[फलश्रुतिः २४: ई स्लोका मेलधिकारिगळिगे निष्ठेयन्नु प्रतिफल नीडुत्तदे.]

द्रुह्यंतीं हृद्द्रुहं मां द्रुतमनिलबला द्द्रावयंतीम विद्या
निद्रां विद्राव्य सद्यो रचनपटुमथाऽ पाद्य विद्यासमुद्र ।
वाग्देवी सासुविद्या द्रविणद विदिता द्रौपदी रुद्रपत्न्या
द्युद्रिक्ता द्रागभद्रा द्रहयतु दयिता पूर्व भीमाऽज्ञ याते ॥ २५ ॥

[फलश्रुतिः २५: ई स्लोका भाषणदल्लि स्पष्टते नीडुत्तदे मत्तु अज्ञानवन्नु नाशपडिसुत्तदे.]

याभ्यां शुश्रूषुरासीः कुरुकुल जनने क्षत्र विप्रो दिताभ्यां
ब्रह्मभ्यां बृंहिताभ्यां चितिसुख वपुषा कृष्णनामा स्पदाभ्याम् ।
निर्भेदाभ्यां विशेषादि्द्व वचन विषयाभ्या मुभाभ्याम् अमूभ्यां
तुभ्यं च क्षेमदेभ्यः सरसिज विलस ल्लोचनेभ्यो नमोऽस्तु ॥ २६ ॥

[फलश्रुतिः २६: ई स्लोका गुरु भक्ति नीडुत्तदे.]

गच्चन् सौगंधिकार्थं पथिस हनुमतः पुच्छ मच्छस्य भीमः
प्रोद्धर्तुं नाशकत्स त्वमुमुरु वपुषा भीषया मासचेति ।
पूर्णज्ञानौ जसोस्ते गुरुतम वपुषोः श्रीमद् आनंदतीर्थ
क्रीडामात्रं तदेतत् प्रमदद सुधियां मोहक द्वेष भाजाम् ॥ २७ ॥

[फलश्रुतिः २७: ई स्लोका ओब्बर केलसगळल्लि यशस्सन्नु नीडुत्तदे.]

बह्वीः कोटीरटीकः कुटिल कटुमती नुत्कटा टोपकोपान्
द्राक् च त्वं सत्वरत्वा च्छरणद गदया पोथया मासिथारीन् ।
उन्मथ्या तथ्यमिथ्या त्ववचन वचना नुत्पथ स्थांस्तथा
ऽन्यान्प्रायच्छः स्वप्रियायै प्रियतम कुसुमं प्राण तस्मै नमस्ते ॥ २८ ॥

[फलश्रुतिः २८: ई स्लोका सुळ्ळु मत्तु वंचनेय विरुद्ध रक्षिसुत्तदे.]

मध्वा

देहा दुत्क्रामि तानाम अधिपति रसताम अक्रमाद् वक्रबुद्धिः
क्रुद्धः क्रोधैक वश्यः कृमिरिव मणिमान् दुष्कृती निष्क्रि यार्थम् ।
चक्रे भूचक्र मेत्य क्रकचमिवसतां चेतसः कष्ट शास्त्रं
दुस्तर्कं चक्रपाणे गुणगण विरहं जीवतां चाधिकृत्य ॥ २९ ॥

[फलश्रुतिः २९: ई स्लोकावु निम्मन्नु समाजक्के हेच्चु
जनप्रियगोळिसुत्तदे मत्तु बेलेबाळुवंते माडुत्तदे.]

तद्दुष्प् रेक्षानुसारा त्कतिपयकुनरै रादृतोऽन्यै र्विसृष्टो
ब्रह्माऽहं निर्गुणोऽहं वितथ मिदमिति ह्येष पाषंड वादः ।
तद्युक्त्या भासजाल प्रसरविषतरू द्दाहदक्ष प्रमाण
ज्वाला मालाधरोऽग्निः पवन विजयते तेऽव तार स्तृतीयः ॥ ३० ॥

[फलश्रुतिः ३०: ई स्लोकावु चर्चेगळल्लि यशस्सन्नु नीडुत्तदे.]

आक्रोशंतो निआशा भयभरवि वशस्वाशया श्छिन्नदर्पा
वाशंतो देशनाश स्त्विति बत कुधियां नाशमाशा दशाऽशु ।
धावंतो ऽश्लीलशीला वितथ शपथ शापाशिवाः शांतशौर्या
स्त्वद्व्याख्या सिंहनादे सपदि ददृशिरे मायिगो मायवस्ते ॥ ३१ ॥

[फलश्रुतिः ३१: ई स्लोका ओब्बर शत्रुगळन्नु सोलिसुत्तदे.]

त्रिष्वप्ये वावतारे ष्वरिभिरपघृणं हिंसितो निर्विकारः

सर्वज्ञः सर्वशक्तिः सकल गुणगणा पूर्णरूप प्रगल्भः ।
स्वच्छः स्वच्छंद मृत्युः सुखयसि सुजनं देव किं चित्रमत्र
त्राता यस्य त्रिधामा जगदुत वशगं किंकराः शंकराद्याः ॥ ३२ ॥

[फलश्रुतिः ३२: ई स्लोका अकालिक मरणवन्नु तडेयुत्तदे मत्तु
ख्यातियन्नु साधिसलु सहाय माडुत्तदे.]

उद्यन् मंदस्मितश्री मृदुमधुमधुरा लापपी यूषधाराप्
ऊरा सेकोपशांता सुखसुजनमनोलोचना पीयमानम्।
संद्रक्ष्ये सुंदरंसं दुहदिह महदानंदम् आनंदतीर्थ
श्रीमद् वक्त्रेंदुबिंबं दुरित नुदुदितं नित्यदाहं कदानु ॥ ३३ ॥

[फलश्रुतिः ३३: ई स्लोका प्रबल मत्तु आकर्षक व्यक्तित्ववन्नु
अभिवृद्धिपडिसलु सहाय माडुत्तदे.]

प्राचीना चीर्णपुण्यो च्चयचतुरतरा चारतश्चारुचित्ता
नत्युच्चां रोचयंतीं श्रुतिचितवचनां श्राव कांश्चोद्य चुंचून् ।
व्याख्या मुत्खात दुःखां चिरमुचित महाचार्य चिंतार तांस्ते
चित्रां सच्छास्त्र कर्त श्चरण परिचरां छ्रावया स्मांश्च किंचित् ॥ ३४
॥

[फलश्रुतिः ३४: ई स्लोका ओब्बर आशयगळन्नु पूरैसुत्तदे मत्तु
आसेगळन्नु परिणामकारियागि तिळिसुव सामर्थ्य नीडुत्तदे.]

पीठे रत्नोपक्लृप्ते रुचिर रुचिमणि ज्योतिषा सन्निषण्णं

ब्रह्माणं भाविनंत्वां ज्वलति निजपदे वैदिकाद्याहि विद्याः ।
सेवंते मूर्तिमत्यः सुचरित चरितं भाति गंधर्व गीतं
प्रत्येकं देव संसत्स्वपि तव भगवन् नर्तित द्योवधूषु ॥ ३५ ॥

[फलश्रुतिः ३५: ई स्लोका हेसरु मत्तु ख्यातियन्नु साधिसलु सहाय माडुत्तदे.]

सानु क्रोशैरजस्रं जनि मृतिनिरया द्यूर्मि मालाविलेऽस्मिन्
संसारा ब्धौनिमग्नां छरण मशरणा निच्छतो वीक्ष्य जंतून् ।
युष्माभिः प्रार्थितः सञ् जलनिधि शयनः सत्यवत्यां महर्षे
र्व्यक्तश्चि न्मात्रमूर्तिर् नखलु भगवतः प्राकृतो जातु देहः ॥ ३६ ॥

[फलश्रुतिः ३६: ई स्लोकावु लौकिक लगत्तुगळन्नु बिडिसुवुदु मत्तु उत्तम मक्कळन्नु पडेयुवुदक्के सहाय माडुत्तदे.]

अस्तव्यस्तं समस्त श्रुतिगत मधमै रत्नपूगं यथांधै
रर्थं लोकोप कृत्यै गुणगण निलयः सूत्रया मास कृत्स्नम् ।
योऽसौ व्यासाभिधान स्तमह महरहर् भक्तितस्तत् प्रसादात्
सद्योविद्यो पलब्ध्यै गुरुतम मगुरुं देवदेवं नमामि ॥ ३७ ॥

[फलश्रुतिः ३७: ई स्लोका नष्टगळिंद चेतरिसिकोळ्ळलु सहाय माडुत्तदे.]

आज्ञामन् अन्यैरधार्यां शिरसि परिसर द्रश्मि कोटीर कोटौ
कृष्णस्या क्लिष्टकर्मा दधदनु सरणा दर्थितो देवसंघैः ।

भूमावागत्य भूमन् असुकर मकरो ब्रह्मसूत्रस्य भाष्यं
दुर्भाष्यं व्यस्यदस्यो मणिमत उदितं वेद सद्युक्ति भिस्त्वम् ॥ ३८ ॥

[फलश्रुतिः ३८: ई स्लोका हणवन्नु गळिसलु सहाय माडुत्तदे.]

भूत्वा क्षेत्रे विशुद्धे द्विजगण निलये रूप्यपी ठाभिधाने
तत्रापि ब्रह्मजाति स्त्रिभुवनविशदे मध्य गेहाख्यगेहे ।
पारि व्राज्याधिराजः पुनरपि बदरीं प्राप्य कृष्णं चनत्वा
कृत्वा भाष्याणि सम्यग् व्यतनुतच भवान् भारतार्थ प्रकाशम् ॥ ३९ ॥

[फलश्रुतिः ३९: ई स्लोकावु मक्कळिंद लाभ पडेयलु अनकूल माडुत्तदे.]

वंदे तं त्वा सुपूर्ण प्रमति मनुदिना सेवितं देववृंदै
र्वंदे वंदारुमीशे श्रिय उत नियतं श्रीमद् आनंदतीर्थम् ।
वंदे मंदाकिनी सत् सरिद मलजला सेकसाधिक्य संगं
वंदेऽहं देव भक्त्या भवभय दहनं सज्जनान् मोदयंतम् ॥ ४० ॥

[फलश्रुतिः ४०: ई स्लोकावु ग्रहगळ केट्ट परिणामगळन्नु परिहरिसुत्तदे.]

फलश्रुतिः

सुब्रह्मण्याख्य सूरेः सुत इति सुभृशं केशवा नंद तीर्थ–
श्रीमत् पादाब्जभक्तः स्तुति मकृत हरेर् वायुदेवस्य चास्य ।
तत्पादार् चादरेण ग्रथितपदल सन्मालया त्वेतया ये
संराध्या मूनमंति प्रतत मतिगुणा मुक्तिमेते व्रजंति ॥ ४१ ॥
॥ इति कविकुलतिलक श्रीमत् त्रिविक्रमपंडिताचार्य कृता
वायुस्तुतिः संपूर्णा ॥

[फलश्रुतिः ४१: ई स्लोकावु लौकिक लगत्तुगळिंद
बिडुगडेगोळ्ळुत्तदे.]

॥ श्री नरसिंहनखस्तुतिः ॥

पांत्वस्मान् पुरुहूतवैरिबलवन् मातंग माद्यद्धटा
कुंभोच्चाद्रि विपाटनाधि कपटु प्रत्येक वज्रायिताः ।
श्रीमत्कंठीरवास्य प्रततसुनखरा दारितारातिदूर
प्रध्व स्तध्वांतशांत प्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकांत समंततोऽपि कलयन् नैवेशि तुस्ते समं
पश्याम् युत्तमवस्तु दूरतरतो आपास्तं रसो योऽष्टमः ।
यद्रो षोत्कर दक्षनेत्रकुटिल प्रांतोत्थिताग्नि स्फुरत्
खद्यो तोपम विष्फुलिंग भसिता ब्रह्मेश शक्रोत्करा: ॥ २ ॥

पुरस्चरण

॥ श्री नरसिंहनखस्तुतिः ॥

पांत्वस्मान् पुरुहूतवैरिबलवन् मातंग माद्यद्धटा
कुंभोच्चाद्रि विपाटनाधि कपटु प्रत्येक वज्रायिताः ।
श्रीमत्कंठीरवास्य प्रततसुनखरा दारितारातिदूर
प्रध्व स्तध्वांतशांत प्रविततमनसा भाविता भूरिभागैः ॥ १ ॥
लक्ष्मीकांत समंततोऽपि कलयन् नैवेशि तुस्ते समं
पश्याम् युत्तमवस्तु दूरतरतो आपास्तं रसो योऽष्टमः ।
यद्रो षोत्कर दक्षनेत्रकुटिल प्रांतोत्थिताग्नि स्फुरत्
खद्यो तोपम विष्फुलिंग भसिता ब्रह्मेश शक्रोत्कराः ॥ २ ॥
॥ इति श्रीमद् आनंदतीर्थ भगवत् पादकृता श्री नरसिंह नखस्तुतिः संपूर्णा ॥
फलश्रुतिः

सुब्रह्मण्याख्य सूरेः सुत इति सुभृशं केशवा नंद तीर्थ–
श्रीमत् पादाब्जभक्तः स्तुति मकृत हरेर् वायुदेवस्य चास्य ।
तत्पादार् चादरेण ग्रथितपदल सन्मालया त्वेतया ये
संराध्या मूनमंति प्रतत मतिगुणा मुक्तिमेते व्रजंति ॥ ४१ ॥
॥ इति कविकुलतिलक श्रीमत् त्रिविक्रमपंडिताचार्य कृता वायुस्तुतिः संपूर्णा ॥

मध्वा
वंदे तं त्वा सुपूर्ण प्रमति मनुदिना सेवितं देववृंदै
वंदे वंदारुमीशे श्रिय उत नियतं श्रीमद् आनंदतीर्थम् ।
वंदे मंदाकिनी सत् सरिद मलजला सेकसाधिक्य संगं

वंदेऽहं देव भक्त्या भवभय दहनं सज्जनान् मोदयंतम् ॥ ४० ॥

भूत्वा क्षेत्रे विशुद्धे द्विजगण निलये रूप्यपी ठाभिधाने
तत्रापि ब्रह्मजाति स्त्रिभुवनविशदे मध्य गेहाख्यगेहे ।
पारि व्राज्याधिराजः पुनरपि बदरीं प्राप्य कृष्णं चनत्वा
कृत्वा भाष्याणि सम्यग् व्यतनुतच भवान् भारतार्थ प्रकाशम् ॥ ३९
॥

आज्ञामन् अन्यैरधार्यां शिरसि परिसर द्रश्मि कोटीर कोटौ
कृष्णस्या क्लिष्टकर्मा दधदनु सरणा दर्थितो देवसंघैः ।
भूमावागत्य भूमन् असुकर मकरो र्ब्रह्मसूत्रस्य भाष्यं
दुर्भाष्यं व्यस्यदस्यो र्मणिमत उदितं वेद सद्युक्ति भिस्त्वम् ॥ ३८
॥

अस्तव्यस्तं समस्त श्रुतिगत मधमै रत्नपूगं यथांधै
रर्थं लोकोप कृत्यै गुणगण निलयः सूत्रया मास कृत्स्नम् ।
योऽसौ व्यासाभिधान स्तमह महरहर् भक्तितस्तत् प्रसादात्
सद्योविद्यो पलब्ध्यै गुरुतम मगुरुं देवदेवं नमामि ॥ ३७ ॥

सानु क्रोशैरजस्रं जनि मृतिनिरया द्यूर्मि मालाविलेऽस्मिन्
संसारा ब्धौनिमग्नां छरण मशरणा निच्छतो वीक्ष्य जंतून् ।
युष्माभिः प्रार्थितः सञ् जलनिधि शयनः सत्यवत्यां महर्षे
र्व्यक्तश्चि न्मात्रमूर्तिर् नखलु भगवतः प्राकृतो जातु देहः ॥ ३६ ॥

पीठे रत्नोपक्लृप्ते रुचिर रुचिमणि ज्योतिषा सन्निषण्णं

ब्रह्माणं भाविनंत्वां ज्वलति निजपदे वैदिकाद्याहि विद्याः ।
सेवंते मूर्तिमत्यः सुचरित चरितं भाति गंधर्व गीतं
प्रत्येकं देव संसत्स्वपि तव भगवन् नर्तित द्योवधूषु ॥ ३५ ॥

प्राचीना चीर्णपुण्यो च्चयचतुरतरा चारतश्चारुचित्ता
नत्युच्चां रोचयंतीं श्रुतिचितवचनां श्राव कांश्चोद्य चुंचून् ।
व्याख्या मुत्खात दुःखां चिरमुचित महाचार्य चिंतार तांस्ते
चित्रां सच्छास्त्र कर्त श्चरण परिचरां छ्रावया स्मांश्च किंचित् ॥ ३४
॥

उद्यन् मंदस्मितश्री मृदुमधुमधुरा लापपी यूषधाराप्
ऊरा सेकोपशांता सुखसुजनमनोलोचना पीयमानम्।
संद्रक्ष्ये सुंदरंसं दुहदिह महदानंदम् आनंदतीर्थ
श्रीमद् वक्त्रेंदुबिंबं दुरित नुदुदितं नित्यदाहं कदानु ॥ ३३ ॥

त्रिष्वप्ये वावतारे ष्वरिभिरपघृणं हिंसितो निर्विकारः
सर्वज्ञः सर्वशक्तिः सकल गुणगणा पूर्णरूप प्रगल्भः ।
स्वच्छः स्वच्छंद मृत्युः सुखयसि सुजनं देव किं चित्रमत्र
त्राता यस्य त्रिधामा जगदुत वशगं किंकराः शंकराद्याः ॥ ३२ ॥

आक्रोशंतो निआशा भयभरवि वशस्वाशया श्छिन्नदर्पा
वाशंतो देशनाश स्त्विति बत कुधियां नाशमाशा दशाऽशु ।
धावंतो ऽश्लीलशीला वितथ शपथ शापाशिवाः शांतशौर्या
स्त्वद्व्याख्या सिंहनादे सपदि ददृशिरे मायिगो मायवस्ते ॥ ३१ ॥

तद्दुष्प् रेक्षानुसारा त्कतिपयकुनरै रादृतोऽन्यै र्विसृष्टो
ब्रह्माऽहं निर्गुणोऽहं वितथ मिदमिति ह्येष पाषंड वादः ।
तद्युक्त्या भासजाल प्रसरविषतरू द्दाहदक्ष प्रमाण
ज्वाला मालाधरोऽग्निः पवन विजयते तेऽव तार स्तृतीयः ॥ ३० ॥

देहा दुत्क्रामि तानाम अधिपति रसताम अक्रमाद् वक्रबुद्धिः
क्रुद्धः क्रोधैक वश्यः कृमिरिव मणिमान् दुष्कृती निष्क्रि यार्थम् ।
चक्रे भूचक्र मेत्य क्रकचमिवसतां चेतसः कष्ट शास्त्रं
दुस्तर्कं चक्रपाणे गुणगण विरहं जीवतां चाधिकृत्य ॥ २९ ॥

भीमसेन

बह्वीः कोटीरटीकः कुटिल कटुमती नुत्कटा टोपकोपान्
द्राक् च त्वं सत्वरत्वा च्छरणद गदया पोथया मासिथारीन् ।
उन्मथ्या तथ्यमिथ्या त्ववचन वचना नुत्पथ स्थांस्तथा
ऽन्यान्प्रायच्छः स्वप्रियायै प्रियतम कुसुमं प्राण तस्मै नमस्ते ॥
२८ ॥

गच्चन् सौगंधिकार्थं पथिस हनुमतः पुच्छ मच्छस्य भीमः
प्रोद्धर्तुं नाशकत्स त्वमुमुरु वपुषा भीषया मासचेति ।
पूर्णज्ञानौ जसोस्ते गुरुतम वपुषोः श्रीमद् आनंदतीर्थ
क्रीडामात्रं तदेतत् प्रमदद सुधियां मोहक द्वेष भाजाम् ॥ २७ ॥

याभ्यां शुश्रूषुरासीः कुरुकुल जनने क्षत्र विप्रो दिताभ्यां
ब्रह्मभ्यां बृंहिताभ्यां चितिसुख वपुषा कृष्णनामा स्पदाभ्याम् ।

निर्भेदाभ्यां विशेषादि्द्व वचन विषयाभ्या मुभाभ्याम् अमूभ्यां
तुभ्यं च क्षेमदेभ्यः सरसिज विलस ल्लोचनेभ्यो नमोऽस्तु ॥ २६
॥

द्रुह्यंतीं हृद्द्रुहं मां द्रुतमनिलबला द्द्रावयंतीम विद्या
निद्रां विद्राव्य सद्यो रचनपटुमथाऽ पाद्य विद्यासमुद्र ।
वाग्देवी सासुविद्या द्रविणद विदिता द्रौपदी रुद्रपत्न्या
द्युद्रिक्ता द्रागभद्रा द्रहयतु दयिता पूर्व भीमाऽज्ञ याते ॥ २५ ॥

क्ष्वेला क्षीणाट्टहासं तवरणमरि हन्न् उद्गदो द्दामबाहो
र्बह्वक् षौहिण्यनीक क्षपण सुनिपुणं यस्य सर्वोत्तमस्य ।
शुश्रूषार्थं चकर्थ स्वयमयमथसं वक्तुम् आनंदतीर्थ-
श्रीमन्नामन् समर्थ स्त्वमपि हि युवयोः पादपद्मं प्रपद्ये ॥ २४ ॥

निर्मृद्नन् अत्ययत्नं विजरवरजरा संधकायास्थि संधी
न्युद्धेत्वं स्वध्वरे वा पशुमिव दमयन् विष्णुपक्षद् विडीशम् ।
यावत् प्रत्यक्षभूतं निखिल मखभुजं तर्पया मासिथासौ
तावत्या ऽऽयोजि तृप्त्या किमु वद भगवन् राजसू याश्वमेधे ॥ २३
॥

जघ्ने निघ्नेन विघ्नो बहुल बलबक ध्वंसनाद्येन शोचद्वि
प्रानुक्रोशपाशै रसुविधृति सुखस्यैक चक्राजनानाम्।
तस्मै ते देव कुर्मः कुरुकुलपतये कर्मणा च प्रणामान्
किर्मीरं दुर्मतीनां प्रथममथ च यो नर्मणा निर्ममाथ ॥ २२ ॥

हनुमन्
देव्या देशप्रणीति द्रुहिण हरवरा वध्यरक्षो विघाताद्
यासेवो द्यद्दयार्द्रः सहभुजमकरो द्रामनामा मुकुंदः ।
दुष्प्रापे पारमेष्ठ्ये करतलमतुलं मूर्ध्नि विन्यस्य धन्यं
तन्वन् भूयः प्रभूत प्रणय विकसिता ब्जेक्षण स्त्वेक्षमाणः ॥ २१ ॥

दृष्ट्वा दुष्टाधि पोरः स्फुटित कनकस द्वर्म घृष्टास्थिकूटं
निष्पिष्टं हाटकाद्रि प्रकट तटतटा कातिशंको जनोऽभूत् ।
येनाजौ रावणारि प्रियनटनपटु र्मुष्टिरिष्टं प्रदेष्टुं
किं नेष्टे मेसतेऽष्टा पदकटकतटि त्कोटिभा मृष्टकाष्ठः ॥ २० ॥

क्षिप्तः पश्चात्सलीलं शतमतुलमते योजनानां सौच्च
स्तावद्वि स्तारवांश्चा प्युपललव इव व्यग्रबुद्ध्या त्वयाऽतः ।
स्वस्वस्था नस्थितातिस् थिरशकलशिला जाल संश्लेषनष्ट
च्छेदांकः प्रागिवाभूत् कपिवरवपुष स्तेनमः कौशलाय ॥ १९ ॥

प्राक् पंचा शत्सहस्रै र्व्यवहितममितं योजनैः पर्वतं त्वं
यावत् संजीवना द्यौषध निधि मधिक प्राण लंकामनैषीः ।
अद्राक्षी दुत्पतंतं तत उत गिरिमुत् पाटयंतं गृहीत्वा
यांतं खे राघवांघ्रौ प्रणतमपि तदै कक्षणे त्वां हि लोकः ॥ १८ ॥
वंदेऽहं तं हनूमान् इति महितमहा पौरुषो बाहुशाली
ख्यात स्तेऽग्र्योऽवतारः सहित इह बहु ब्रह्म चर्यादि धर्मैः ।
सस्नेहानां सहस्वान् अहरहरहितं निर्दहन् देहभाजाम्
अंहो मोहापहोयः स्पृहयति महतीं भक्तिमद्यापि रामे ॥ १७ ॥

मूला वायु
तत्त्वज्ञान् मुक्तिभाजः सुखयसि हि गुरो योग्यता तारतम्याद्
आधत्से मिश्रबुद्धीं स्त्रिदिवनिरयभू गोचरा न्नित्यबद्धान् ।
तामिस्रां धादिकाख्ये तमसि सुबहुलं दुःख यस्यन्य थाज्ञान्
विष्णो राज्ञा भिरित्थं श्रुतिशतमिति हासादिचाऽ कर्णयामः ॥ १६
॥

विष्णो रत्युत्तमत्वाद् अखिलगुणगणै स्तत्र भक्तिं गरिष्ठाम्
आश्लिष्टे श्रीधराभ्याम् अमुमथ परिवारात्मना सेवकेषु ।
यः संधत्ते विरिंचे श्वसनविहगपा नंतरुद्रेंद्रपूर्व
ष्वाध्यायं स्तारतम्यं स्फुटमवति सदा वायुरस्मद् गुरुस्तम् ॥ १५
॥

मातर्मे मातरिश्वन् पितरतुलगुरो भ्रातरिष्टाप्त बंधो
स्वामिन् सर्वांतरात्मन् नजरजरयितर् जन्म मृत्याम् अयानाम् ।
गोविंदे देहि भक्तिं भवति च भगवन्न् ऊर्जितां निर्निमित्तां
निर्व्याजां निश्चलां सद्गुणगण बृहतीं शाश्वतीम् आशुदेव ॥ १४ ।

क्षुत्क्षामान् रूक्षरक्षो रदखरनखर क्षुण्ण विक्षोभि ताक्षान्
आमग्ना नंधकूपे क्षुरमुख मुखरैः पक्षिभि र्विक्षतांगान् ।
पूया सृङ्मूत्रविष्ठा कृमिकुल कलिले तत्क्षण क्षिप्तशक्त्या
द्यस्त्र व्रातादितांस्त्व द्द्विष उपजिहते वज्रकल्पा जलूकाः ॥ १३ ॥

अस्मिन्न स्मद्गुरूणां हरिचरण चिरध्यान सन्मंगलानां
युष्माकं पार्श्व भूमिं धृतरणरणिक स्वर्गिसेव्यां प्रपन्नः ।

यस्तूदास्तेस आस्ते अधिभवम सुलभ क्लेश निर्मोकमस्त
प्रायानंदं कथंचि न्नवसति सततं पंच कष्टेऽति कष्टे ॥ १२ ॥

उत्तप्ता त्युत्कटत्विट् प्रकटकटकट ध्वानसंघट्ट नोद्यद्विद्
युद्व्य् ऊढस्फुलिंग प्रकर विकिरणो त्क्राथिते बाधितांगान् ।
उद्गाढं पात्यमाना तमसि तत इतः किंकरैः पंकिलेते
पंक्तिर्ग्राव्णां गरिम्णा ग्लपयतिहिभव द्द्वेषिणो विद्वदाद्य ॥ ११ ॥
आनंदा न्मंदमंदा ददतिहि मरुतः कुंद मंदार नंद्या
वर्त्यामोदान् दधाना मृदपदमुदितो द्गीतकैः सुंदरीणाम् ।
वृंदै रावंद्यमुक्ते द्वहि मगुमद नाहींद्र देवेंद्रसेव्ये
मौकुंदे मंदरेऽस्मिन् नविरतमुदयन् मोदिनां देवदेव ॥ १० ॥

येऽमुं भावं भजंते सुरमुख सुजना राधितं ते तृतीयं
भासंते भासुरैस्ते सहचरचलितै श्चामरै श्चारुवेषाः ।
वैकुंठे कंठलग्न स्थिरशुचि विलसत् कांति तारुण्यलीला
लावण्या पूर्णकांता कुचभरसुलभा श्लेष सम्मोद सांद्राः ॥ ९ ॥

साभ्रोष्णा भीशु शुभ्र प्रभम भयनभो भूरि भू भृद्वि भूति
भ्राजिष्णु र्भूऋभूणां भवनमपि विभो ऽभेदि बभ्रे बभूवे ।
येनभ्रू विभ्रमस्ते भ्रमयतु सुभृशं बर्भृ वद्दुर् भृताशान्
भ्रांतिर् भेदाव भासस् त्विति भयमभि भूर् भोक्ष्यतो मायिभिक्षून् ॥
८ ॥

मूर्धन्ये षोऽंजलिर्मे दृढतर मिहते बध्यते बंध पाश
च्छेत्रे दात्रे सुखानां भजति भुवि भविष्य द्विधात्रे द्युभर्त्रे ।

अत्यंतं संततंत्वं प्रदिश पदयुगे हंत संताप भाजाम्
अस्माकं भक्तिमेकां भगवत उतते माधवस्याथ वायोः ॥ ७ ॥

मंगलाचरण
संसारो त्तापनित्यो पशमदसदय स्नेहहा सांबुपूर
प्रोद्य द्विद्यानवद्य द्युतिमणि किरण श्रेणि संपूरिताशः।
श्रीवत्सां काधिवासो चिततरसरल श्रीमद् आनंदतीर्थ
क्षीरांभो धिर्विभिंद्याद् भवदनभिमतं भूरिमे भूतिहेतुः ॥ ६ ॥

उद्यद्विद्युत् विप्रचंडां निजरुचिनिकर व्याप्त लोकावकाशो
बिभ्रद् भीमो भुजेयो ऽभ्युदितदिनकरा भांगदाढ्य प्रकांडे ।
वीर्यो व्द्धार्यां गदाग्र्याम यमिह सुमतिं वायुदेवो विदध्य्
आदध्यात्म ज्ञाननेता यतिवर महितो भूमि भूषा मणिर्मे ॥ ५ ॥

अस्या विष्कर्तुकामं कलिमलकलुषे ऽस्मिन्जने ज्ञानमार्गं
वंद्यं चंद्रेंद्र रुद्र द्युमणि फणिवयो नायकाद्यैरि हाद्य ।
मध्वाख्यं मंत्रसिद्धं किमुत कृतवतो मारु तस्यावतारं
पातारं पारमेष्ठ्यं पदमपविपदः प्राप्तुरा पन्नपुंसाम् ॥ ४ ॥
जन्माधि व्याध्युपाधि प्रतिहति विरह प्रापकाणां गुणानाम
अग्र्याणाम् मर्पकाणां चिरमुदित चिदानंद संदोहदानाम्।
ऐतेषा मेष दोष प्रमुषित मनसां द्वेषिणां दूषकाणां
दैत्यानाम् आर्तिमंधे तमसि विदधतां संस्तवे नास्मि शक्तः ॥ ३ ॥

उत्कंठा कुंठकोला हलजवविदिता जस्र सेवानुवृद्ध
प्राज्ञा त्मज्ञानधूतां धतमससुमनो मौलिरत्नाव लीनाम्।

भक्त्यु द्रेकावगाड प्रघटनसधटा त्कार संघृष्यमाण प्रांत प्रांग्र्यांघ्रि
पीठ् त्त्थितकनकरजः पिंजरा रंजिताशाः ॥२॥

ॐम् ॥ श्रीमद् विष्ण्वंघ्रिनिष्ठा आतिगुण गुरुतम श्रीमदानंदतीर्थ
त्रैलोक्या चार्य पादो ज्ज्वलजल जलसत् पांत् वोऽस्मान् पुनंतु ।
वाचां यत्र प्रणेत्री त्रिभुवन महिता शारदा शारदेंदु
ज्योत्स्ना भद्रस्मितश्री धवलितककुभा प्रेम भारंबभार ॥ १ ॥

॥ श्री नरसिंहनखस्तुतिः ॥

पांत्वस्मान् पुरुहूतवैरिबलवन् मातंग माद्यद्धटा
कुंभोच्चाद्रि विपाटनाधि कपटु प्रत्येक वज्रायिताः ।
श्रीमत्कंठीरवास्य प्रततसुनखरा दारितारातिदूर
प्रध्व स्तध्वांतशांत प्रविततमनसा भाविता भूरिभागैः ॥ १ ॥

लक्ष्मीकांत समंततोऽपि कलयन् नैवेशि तुस्ते समं
पश्याम् युत्तमवस्तु दूरतरतो आपास्तं रसो योऽष्टमः ।
यद्रो षोत्कर दक्षनेत्रकुटिल प्रांतोत्थिताग्नि स्फुरत्
खद्यो तोपम विष्फुलिंग भसिता ब्रह्मेश शक्रोत्कराः ॥ २ ॥

॥ इति श्रीमद् आनंदतीर्थ भगवत् पादकृता श्री नरसिंह नखस्तुतिः
संपूर्णा ॥